Title षट्पदीस्तोत्रम् विवरणम्

Author श्रीशंकराचार्यः

Extent ४ Age

Subject स्तोत्रम् · सम्पूर्णम्

श्रीगणेशाय नमः

षट्पदीविवरणम्

४ पत्रे

नं० १०११-च

पत्राणि ४ (चत्वारि) (सम्पूर्णम्)

कर्त्ता श्री शंकराचार्यः

ॐ श्रीकल्पचंद्रायगुरवेनमः श्रीरामचरणद्वंद्वजगद्वंद्वैकवन्दितम् वंदेभ
क्तयापरानंदंमनामयं श्रीशंकरवचोगङ्गासंगमेननिजंवचः पवित्रयितुमेवैतां
षट्पदीविवृणोम्यहं २ समस्तविद्याप्रवर्त्तकः समस्तपुरुषार्थसाधकः श्री
महेश्वरः समस्तवेदार्थवैनाशिकार्द्धवैनाशिकादिभिस्तमः प्रचुरैर्व्याकुलमाक
लय्य श्रीशंकराचार्यरूपेणावतीर्य तमेववेदार्थंनानोपनिषदादिभाष्येषुवि
स्पष्टंप्रकाशयामास तंचवेदार्थंनानाग्रंथेषुविक्षिप्तमिवा लक्ष्यषट्पद्यानिबद्धं
ध्यानाभिमांषट्पदींकाशीवासीसमस्तविद्यापारदृश्वा श्रीरामचंद्रविवृणोति न

ॐ अविनयमपनयविष्णोर्दमयमनःशमयविषयमृगतृष्णाम्

नुषट्पदीस्तोत्रे प्रथमश्लोकेएवस्तुतिर्नप्रतीयते इतिचेन्न विष्णोइतिसं
बुध्यन्तेनविष्णोपदेन अविवक्षितसत्यासत्यविशेषगुणकीर्तनरूपायःस्तुते
प्रतीतेःविष्लृव्याप्ताविति धातुःचेचेष्टिजगद्व्याप्नोतीतिविष्णुः ततःक्रियापदोया
क्रियाशब्देचक्रिया अप्राधान्येनप्रतीयतेक्रियाम्नयमप्राधान्येन एवंसति अ
त्रभिक्षुकसेवकपाचकइत्यादिसंबोधनांतेषुभिक्षासेवापाकादिदोषरूपक्रिया॥
अप्राधान्येननिंदावज्जगद्व्याप्तिरूपगुणवर्णनिरूपस्तुतिप्रतीतिरस्त्येवविष्णुशब्द
स्यव्यापकपदार्थवाचकःसचपरमात्मैव ननुसंतिदिक्कालाकाशाइतिचेन्नतेषांका

ष०प० ध्येत्वेनव्याप्यत्वात् कार्यत्वेचमानंतस्मादात्मनआकाशःसंभूतइत्येवमादिश्रुतिरव।
१ तथाचपारमार्थिकसत्त्वंनाविपद्यते इत्येतमतिप्रसङ्गेनप्रकृतमनुसरामः सर्वगुणो
पाहारित्वेनमस्मद्दोषवत्त्वंयतोऽविनयस्यपतस्तदऽभावंप्रार्थयते दमयइतिमित्या मम
यदत्वेवकृस्वत्वंविषयसुखाशातपाहिमनोदुर्दान्तंभवत्यतोविषयाशातद्भावंप्रार्थय
ते शमयविषयेतिसत्त्वच्छंदनादयोविषयास्ते रसाइवविषयरसास्तेषुतृष्णां शमयअप्राप्ते
वस्तुनिलालतृष्णा यद्वाविषयरसोविषयप्रीतिस्तत्रतृष्णा अविनयोऽपनयेहत्वंनर
माहभूतेति भूतेषुजीवेषुदयांस्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छांविस्तारयविस्ती
र्णीकुरु दयालुर्हिसर्वत्रविनीतोभवति एवंप्रार्थितदानेनज्ञानद्वारामदीयंसंसारं

भूतदयांविस्तारयतारयसंसारसागरतः १ ॥

निवर्तयेतिप्रार्थयते तारयेति संसारःसागरइव संसारसागरःसंसारसागरा।
दिति संसारसागरतःतारयपरंब्रह्मनयेत्यर्थः अनुहिअविनयाऽपनयादिप्रार्थना
पंचकविषयत्वेनापि श्रीविष्णोःपरमोत्कर्षवर्णननरूपस्तुतिरर्थाद्भवतीति बोद्धु
व्यमित्यूषेनहिउत्कृष्टःप्रार्थ्यतइत्यादि १ श्रीशंकरहेविष्णोपरमात्मन् अविनयं
दुर्विनीततांअपनयदूरीकुरु प्रार्थनेचात्रलोट् अदांतमनाहानमास्तिइतिसर्वोऽप्या रुष
क्षिपति अतोमनोदमंप्रार्थयते ननुप्रार्थनामात्रेणकथंसंसारसागरतरणस्या ॥ ३
नइत्याशंकायां संसारतरणेअंतरंगसाधनंभगवद्भक्तिंविधत्ते १

श्रीपतिपदारविंदे अहं वंदे नमस्कारोमि स्तोमि चेत्यन्वयः पदे अरविंदे इव पदारविन्दे
श्रीयः पतिः श्रीपतिस्तस्य पदारविंदे इति तथा श्रीपतिपदारविंदे पुरुषार्थप्रदत्वेनावि
शिनष्टि भवाद्भयं च खेदश्च तयोः छिदा छेदनं याभ्यां ध्यानमात्रेणेति तथ अरविंद
स्यादृश्यार्थं पुनर्विशिनष्टि पदद्वयेन दिव्या चासौ धुनी च दिव्यधुनी गङ्गा साम
करंदो ययोस्ते तथा परिमलपरिभोगः सच्चिदानंदो ययोस्ते तथा मनोहारित्वेना
त्र भेदोपचारः परिमलपरिभोगः सौरभ्यविस्तारः स चासौ चिच्चासावानंदश्चेति
तथा मानंद इत्येतावन्मात्रे वक्तव्ये न पायिकमिमनसुखवज्जडतापरस्ज्येतत

दिव्यधुनिमकरंदे परिमलपरिभोगसच्चिदानंदे ॥
श्रीपतिपदारविंदे भवभयखेदच्छिदे वन्दे २ ॥

तदर्थं चिदिति तथा न हृदेवानित्यतापि प्रसज्येत तद्धाव त्वर्थं सदिति सच्चिदा
नंदो ब्रह्मसुखं श्रीपतिपदारविंदयोः सच्चिदानंदस्य च यद्यपि न भेदः तथापि भे
दारोपणाबहुव्रीहिर्द्रष्टव्यः यद्वा परिमलपरिभोगेन सतां भक्तानां चिदानंदो ज्ञान
सुखं याभ्यां ते परिमलपरिभोगेन भक्तानां सुखजनक इत्यर्थः ननु जीवेश्वरयोः
परमार्थतोऽभेदे सति केनापि विशेषेण जीवः सेवक एव परमेश्वर एव सेव्य इत्यपेक्षा
यां जीवेश्वरयोर्भेदको विशेषो दर्शयन् भगवंतं स्तोति २ ॥ सत्यपीति ॥
॥ राम ॥ कृष्ण ॥ गोविंद ॥ नारायण ॥ हरी ॥ दामोदर ॥ शिव ॥

ष०प०
२
2

एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेत्येवमादिषूपनिषत्सु विचार्यमाणा-
सु वस्तुतो भेदो नास्त्येव तथाप्यविद्यादशायामविदुषां जनानां भेदाभ्यासे भेदानुभवे
सति नाथनं याच्ञोपतापैश्वर्याशीःष्विति धातुः नाथति ब्रह्माणमारभ्यापि-
पीलिकापर्यन्तमिष्ट इति नाथः तत्संबोधनं हे नाथ परमेश्वर त्वां श्रितः परमैश्व-
र्यस्याहमंशः ईशितव्यश्च भवामीति शेषः सत्यपि भेदे कदाचित्परमेश्वरःपि अंशि-
त्वं प्रसजेत तन्निवारणार्थमाह न मामकीनस्त्वं मम त्वमंशो नेत्यर्थः भेदापगमे स-
ति अंशांशी सेवकसेव्यव्यवहारावगम इत्यर्थः वशीकृतमायत्वं परमेश्वरे मायया

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वं
सामुद्रो हि तरंगः क्वचन समुद्रो हि न तारङ्गः ३ ॥

वशत्वं च जीवे इत्यभिप्रायः जीवेश्वरयोरंशांशिभावे च यथाग्नेर्विस्फुलिङ्गा व्युच्च-
रन्त्येवमादिश्रुतिरेव प्रमाणं तवेत्यत्र संबंधे षष्ठी स च संबंधो अंशांशीभावरू-
प एतदेव दृष्टान्तेन द्रढयति सामुद्रः समुद्रस्यांशस्तरंगः क्वचन कस्मिंश्चिद्देशे
काले वा तारंगस्तरंगस्यांशः समुद्रो नेत्यर्थः हि शब्दो जगत्प्रसिद्धं द्योतयति स-
त्यपि भेदापगम इति पाठे वस्तुतो भेदापगमे भेदाभावे सति अविद्यादशायां भेदा-
रोपेण नाथ तवाहं न मामकीनस्त्वमिति व्यवहार इत्यर्थः एतेन श्लोकजपेन स-
मन्वयसाधना विशिष्या अध्यायजपार्थाः संक्षेपेणोक्ताः द्रष्टव्याः तत्राविरोधादिति
पदेन समन्वय अपरेण श्लोकद्वयभागेन साधनं तृतीयश्लोके चाविरोधः ३

पृष्ठ
२

उध्धतनगेति हे मित्रशशिदृष्टे भवति त्वयि दृष्टे साक्षात्कृते सति भवतिरस्कारः
संसारोन्मूलनं किं न भवति अपि तु भवत्येवेत्यन्वयः तथा च श्रुतिः भिद्यते हृदयग्रं
थिः छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति मित्रः सूर्यः
शशी चंद्रः दृष्टी यस्य स तथा तत्संबोधिः तथा भगवंतं विशिनष्टि प्रकर्षेण भवति विद्य
ते इति प्रभवान् तस्मिन् सर्वान्तर्यामिनीत्यर्थः उद्धृतो नगो यमलार्जुनौ येन कृपयास
उध्धृतनगः यद्वा उध्धृतः नगो गोवर्द्धनो येन स तथा तत्संबुद्धिस्तथा एतेन भगवतो
भक्तवात्सल्यं दर्शितं नगान् पर्वतान् भिनत्तीति नगभित् इंद्रस्तस्यानुजो वामन

उद्धृतनगनगभिदनुजदनुजकुलामित्रमित्रशशिदृष्टे ॥
दृष्टे भवति प्रभवति न किं भवति भवतिरस्कारः ॥ ५ ॥

दनुजा दानवास्तेषां कुलं समूहस्तस्यामित्रः शत्रोः दनुजशब्देन दैत्यादयोपि गृह्यं
ते एतेन दुष्टनिग्रहेण भगवतो भक्तपालकत्वमुक्तं ॥ ५ ॥ एवं भगवंतं स्तुत्वा पुनर
पि भक्तपालनैकस्वभावत्वेन भगवंतं स्तुवन् रक्षणं प्रार्थयते म त्स्यादिभिरिति
यस्य नन्वरक्षणमनिष्टनिवारणं मया कार्यमित्यपेक्षायामाह भवः संसारस्तत्र तापः
कामक्रोधाद्विजन्यो निरंतरं हृदयदाहस्तस्माद्भीतो हं भयभीताभीतिर्भीरितिवाक्य
मिति पंचमी समासो त्र तव भक्तपरिपालनस्वभाव एवेत्यभिप्रायेण भगवंतं विशि
नष्टि अखिलवसुधामवितारक्षिता हि शब्दः पुराणप्रसिद्धमाह अवतारवित्तिस्तुच

षं०पं० पितुं पुनः पित्रिनष्टि मत्स्यादिभिरवतारैरवतारवतास्वीकृतावतारेण अनेन पुत्रेणा
३ हं पुत्रीति वदन्नतृतीयासाच हेतौ ५ अथ भगवंतं बहुधा संबोधयन् कालाद्भयाभा
3 वं प्रार्थयते हे दामोदर त्वं मे परमं दरं कालाद्भयमपनयेत्यन्वयः कदाचित्कस्मिंश्चि ॥
दपराधे यशोदया दाम्ना उदरे बंधनाद्दाम उदरे यस्य स तथा तत्संबोधनं अनेन भक्त
वत्सलता दर्शिता भगवतः गुणानां सर्वज्ञत्वसकलजगन्नियंतृत्वपरमकारुणिक
त्वादीनां मंदिरमिवाश्रयो गुणमंदिरं तत्संबोधनं तथा सुंदरं वदनारविंदं यस्य स तथा
तत्संबुद्धिस्तथा गोविंदते स्वामित्वेन लभत इति गोविंदस्तत्संबोधनं तथा अनेन भग

मत्स्यादिभिरवतारैरवतारवतावताऽखिलवसुधाम् परमेश्वरप
रिपाल्यो भवता भवतापभीतोऽहं ५ दामोदर गुणमंदिर सुंदरवदना
रविंद गोविंद भवजलधिमथनमंदर परमं दरमपनय त्वं मे ६ ॥

वतो जगत्पालकता दर्शिता भवजलधिमथने मंदर इवाऽऽवलोडने हेतुः भवजलधि
मथनमंदिरस्तत्संबुद्धिस्तथा एतेन भगवतो भक्तमोचकता दर्शिता कालभयस्य त्र
मत्वं योगतपआदिभिरप्यनिवार्यत्वात् ६ एवं षड्भिर्भगवंतं संस्तूयेदानीं पुरु
षार्थचतुष्टयसाधकं षट्पदीपठनमिति सूचयन् भगवन्नारायण्यानं तत्पूर्वकं पठ
नं प्रार्थयते नारायणेति नाराणां जीवसमूहानां नारं तस्यायनं प्रवृत्तिर्यस्मात्स त कृष्ण
था नारायणस्तत्संबुद्धिस्तथा यद्वा नारमयते साक्षात्पश्यतीति योगस्थो स्तेज्ञानाथाः ३

इतिन्यायेनेति नारायणस्तत्संबोधनं तथा पद्मानारमयनमाश्रयो यस्य तथा तत्संबो
धनं तथा अत्र अदर्शि मुखं यथा प्रतीयते तथा परमेश्वरः कल्पिते जीवसमूहे प्रती
यत इति जीवसमूहाश्रयत्वमुच्यते अत्र क्रमेण व्युत्पत्तित्रयेण नारायणशब्देन स
र्वान्तर्यामि सर्वसाक्षी सर्वाश्रयश्च कथ्यते पूर्वपदात्संज्ञायामग इति सूत्रेण नका
रस्य णत्वं द्रष्टव्यं करुणामय करुणाप्रचुर विभो तावकौ चरणौ करवाणि हृदिस्था
पयामि इत्यर्थः चरणौ विशिनष्टि शरणं आश्रयौ रक्षकौ च अत्रैकवचनान्तोपि शरण
शब्दो द्विवचनान्तस्य चरणशब्दस्य विशेषणं वेदाः प्रमाणमित्यत्र यथा अस्तु कृधातुः

नारायण करुणामय शरणं करवाणि तावकौ चरणौ इति
षट्पदी मदीयवदनसरोजे सदा वसतु ७॥ राम ॥

स्थापनार्थः पादौ पृष्ठे कुरु भाजनं गृहाभ्यन्तरे इत्येवमादि प्रयोगेषु तथा दर्शनात् य
द्वा करणार्थः एव कृधातुः तथा चेऽन्यथाऽनुपपत्तिर्न द्विचरणयोः कार्यं संभवतीति
चेन्न सति विशेषणे विधिनिषेधौ सति विशेष्ये बाधे विशेषणे उपसंक्रामत इति
न्यायेन स्वर्गस्याभिमतत्वे विशेषणे आश्रयणे क्रियायां रक्षणे क्रियायां वाऽन्यथोप
पत्तेः एवं चरणध्यानपूर्वकं षट्पदीपठनं प्रार्थयते इतीति पूर्वोक्तापद्यन्ते गम्यन्तेऽ
र्था एतैरिति पदानि श्लोकाः षण्णां पादानां समाहारः षट्पदी भ्रमरी रूपेण सरोजे
वसति तथैव षट्पदी मदीया षट्पदीकर्तुः मम वदनसरोजे सदा वसतु प्रार्थनायां

लोरणेतेन भगवच्चरणध्यानपूर्वकं षट्पदीपठनं पुरुषार्थचतुष्टयपर्यवसायी
ति सूचितं भवति। ननु नेयं षट्पदी किंतु सप्तपदी नारायणेति श्लोकेन सप्तश्लो
करूपत्वात् सत्यं नारायणेति श्लोकस्य फलस्तुतिपरत्वेन बहिर्भूतत्वादिति षट्प
दीत्वमेव अत्र च वृत्तमार्या तल्लक्षणं चोक्तं श्रुतबोधे यस्याः पादे प्रथमे द्वादश मा
त्रास्तथा तृतीयेपि अष्टादश द्वितीये चतुर्थे पंचदश सार्या ७ इति श्रीसर्वविद्यापा
रदृश्वा काशीवासिना रामचंद्रमिश्रेण विरचितं षट्पदीविवरणं समाप्तं शुभमस्तु
ओं नमो नमः श्रीगुरवे नमः यं विनिद्रा जितश्वासाः संतुष्टाः संयतेंद्रियाः ज्यो
तिः पश्यंति युंजानास्तस्मै विद्यात्मने नमः अथाऽऽत्मानात्मविवेकः कथ्यते॥
आत्मा नाम स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः अवस्थात्रयसाक्षी पंच
कोशविलक्षणः चतुर्विंशतितत्त्वाधारः मायया प्रतीयमानाभ्यां जीवेश्वराभ्यां
भिन्नः नित्यशुद्धबुद्धमुक्तसत्यपरमानंदस्वरूपः निर्मलो निश्चलः पूर्णः पर
मात्मा सनातनः निर्विकारो निराकारः प्रत्यग्भूतः स्वयंप्रभः अथ अनात्मा ना
म स्थूलसूक्ष्मकारणशरीराणि स्थूलशरीरं नाम पंचीकृतपंचमहाभूतका
र्यं प्रारब्धकर्मणा संचितं जीवस्य कर्मफलभूतयोः सुखदुःखयोर्भोगस्या
यतनमुक्तं तदुक्तं पंचीकृतमहाभूतसंभवं कर्मसंचितं शरीरं सुखदुःखानां
भोगायतनमुच्यते इदमेव स्थूलशरीरमन्नमयकोश इत्युच्यते अन्नमयको